

# Invocation

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥
ॐ शान्तिः । शान्तिः । शान्तिः ।

om saha nāvavatu | saha nau bhunaktu |
saha vīryaṁ karavāvahai ||
tejaisvināvadhītamastu mā viidviṣāvahai ||
om śāntiḥ | śāntiḥ | śāntiḥ |

# Gāyatrī mantraḥ

ॐ भूर्भुवस्सुवः । तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

om bhūrbhuvassuvaḥ |
tatsaviturvareṇyaṁ bhargo devasya dhīmahi |
dhiyo yo naḥ pracodayāt ||

# Prayers to Lord *Ganesa*



एकदन्तं महाकायं लम्बोदरं गजाननम् ।
विघ्ननाशकरं देवं हेरम्बं प्रणमाम्यहम् ॥

ekadantaṁ mahākāyaṁ lambodaraṁ gajānanam |
vighna-nāśakaraṁ devaṁ herambhaṁ praṇamāmyaham ||

अगजानन-पद्मार्कं गजाननम्-अहर्निशम् ।
अनेकदं तं भक्तानाम् एकदन्तम्-उपास्महे ॥ १ ॥

agajānana-padmārkaṁ gajānanam-aharniśam |
anekadaṁ taṁ bhaktānām ekadantam-upāsmahe || 1 ||

वक्रतुण्ड महाकाय कोटिसूर्य-समप्रभ ।
निर्विघ्नं कुरु मे देव सर्व-कार्येषु सर्वदा ॥ २ ॥

vakratuṇḍa mahākāya koṭisūrya-samaprabha |
nirvighnaṁ kuru me deva sarva-kāryeṣu sarvadā || 2 ||

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व-विघ्नोपशान्तये ॥ ३ ॥

śuklāṁbaradharaṁ viṣṇuṁ śaśivarṇaṁ caturbhujam |
prasannavadanaṁ dhyāyet sarva-vighnopaśāntaye || 3 ||

# Prayers to Lord *Siva*



शिव प्रार्थना		Śiva prārthanā

ॐ नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय
त्र्यम्बकाय त्रिपुरान्तकाय त्रिकालाग्निकालाय
कालाग्निरुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय
सदाशिवाय श्रीमन् महादेवाय नमः ॥

om namaste astu bhagavan viśveśvarāya
mahādevāya tryambakāya tripurāntakāya
trikālāgnikālāya kālāgnirudrāya
nīlakaṇṭhāya mṛtyuñjayāya sarveśvarāya
sadāśivāya śrīman mahādevāya namaḥ ||



महामृत्युञ्जय मन्त्रः		Mahāmṛtyuñjaya mantraḥ

ॐ त्र्यम्बकं यजामहे		सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनात्		मृत्योर्मुक्षीय माऽमृतात् ॥

om tryambakaṁ yajāmahe		sugandhiṁ puṣṭivardhanam |
urvārukamiva bandhanāt		mṛtyormukṣīya mā'mṛtāt ||

# Prayer to Mother *Parvati*



सर्व-मङ्गल-माङ्गल्ये		शिवे सर्वार्थ-साधिके ।
शरण्ये त्र्यम्बके गौरि		नारायणि नमोऽस्तु ते ॥

sarva-maṅgala-māṅgalye		śive sarvārtha-sādhike |
śaraṇye tryambake gauri		nārāyaṇi namo'stu te ||

# Daily Prayers

## Early morning-upon waking up



कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले तु गोविन्दः प्रभाते करदर्शनम् ॥

karāgre vasate lakṣmiḥ karamadhye sarasvati |
karamūle tu govindaḥ prabhāte karadarśanam ||

## Before getting down from bed

समुद्रवसने देवि पर्वत-स्तन-मण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

samudra-vasane devi parvata-stana-maṇḍale |
viṣṇu-patni namastubhyaṁ pāda-sparśaṁ kṣamasva me ||

## During Bath



गङ्गे च यमुने देवि गोदावरि सरस्वति ।
नर्मदे सिन्धु-कावेरि तीर्थेऽस्मिन् सन्निधिं कुरु ॥

gaṅge ca yamune devi godāvari sarasvati |
narmade sindhu-kāveri tirthes'min sannidhiṁ kuru ||

## Before Studies




सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥

sarasvati namastubhyaṁ varade kāma-rūpiṇi |
vidyārambhaṁ kariṣyāmi siddhir-bhavatu me sadā ||

## Before Meals



ब्रह्मार्पणं ब्रह्महविः ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म-समाधिना ॥

brahmārpaṇaṁ brahmahaviḥ
brahmāgnau brahmaṇā hutam |
brahmaiva tena gantavyaṁ
brahmakarma-samādhinā ||



## Before Evening Lights

शुभं करोति कल्याणम् आरोग्यं धनसंपदः ।
शत्रु-बुद्धि-विनाशाय दीपज्योतिर्नमोऽस्तु ते ॥

śubhaṁ karoti kalyāṇam ārogyaṁ dhana-saṁpadaḥ |
śatru-buddhi-vināśāya dīpa-jyotir-namo'stu te ||

## At night before sleeping

करचरणकृतं वाक्-कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत् क्षमस्व जय जय करुणाब्धे श्री महादेव शम्भो ॥

kara-caraṇa-kṛtaṁ vāk- kāyajaṁ karmajaṁ vā
śravaṇa-nayanajaṁ vā mānasaṁ vā'parādham |
vihitam-avihitaṁ vā sarvametat kṣamasva
jaya jaya karuṇābdhe śrī mahādeva śambho ||

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृते स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

kāyena vācā manasendriyairvā
buddhyātmanā vā prakṛte svabhāvāt |
karomi yadyat sakalaṁ parasmai
nārāyaṇāyeti samarpayāmi ||

